# ॥ वाल्मीकि रामायण॥

## ७ उत्तरकाण्ड

### अध्याय ८६

रामो बहून्यहान्येव तद्गीतं परमाद्भुतम् ।
शुश्राव मुनिभिः सार्धं राजभिः सह वानरैः ॥१॥

तस्मिन्गीते तु विज्ञाय सीतापुत्रौ कुशीलवौ ।
तस्याः परिषदो मध्ये रामो वचनमब्रवीत् ॥२॥

मद्वचो ब्रूत गच्छध्वमिति भगवतोऽन्तिकम् ॥३॥

यदि शुद्धसमाचारा यदि वा वीतकल्मषा ।
करोत्विहात्मनः शुद्धिमनुमान्य महामुनिम् ॥४॥

छन्दं मुनेस्तु विज्ञाय सीतायाश् च मनोगतम् ।
प्रत्ययं दातुकामायास्ततः शंसत मे लघु ॥५॥

श्वः प्रभाते तु शपथं मैथिली जनकात्मजा ।
करोतु परिषन्मध्ये शोधनार्थं ममेह च ॥६॥

श्रुत्वा तु राघवस्यैतद्वचः परममद्भुतम् ।
दूताः सम्प्रययुर्वाटं यत्रास्ते मुनिपुङ्गवः ॥७॥

ते प्रणम्य महात्मानं ज्वलन्तममितप्रभम् ।
ऊचुस्ते राम वाक्यानि मृदूनि मधुराणि च ॥८॥

तेषां तद्भाषितं श्रुत्वा रामस्य च मनोगतम् ।
विज्ञाय सुमहातेजा मुनिर्वाक्यमथाब्रवीत् ॥९॥

एवं भवतु भद्रं वो यथा तुष्यति राघवः ।
तथा करिष्यते सीता दैवतं हि पतिः स्त्रियाः ॥१०॥

तथोक्ता मुनिना सर्वे रामदूता महौजसः ।
प्रत्येत्य राघवं सर्वे मुनिवाक्यं बभाषिरे ॥११॥

ततः प्रहृष्टः काकुत्स्थः श्रुत्वा वाक्यं महात्मनः ।
ऋषींस्तत्र समेतांश्च राज्ञश्चैवाभ्यभाषत ॥१२॥

भगवन्तः सशिष्या वै सानुगश्च नराधिपाः ।
पश्यन्तु सीताशपथं यश्चैवान्योऽभिकाङ्क्षते ॥१३॥

तस्य तद्वचनं श्रुत्वा राघवस्य महात्मनः ।
सर्वेषमृषिमुख्यानां साधुवादो महानभूत् ॥१४॥

राजानश्च महात्मानः प्रशंसन्ति स्म राघवम् ।
उपपन्नं नरश्रेष्ठ त्वय्येव भुवि नान्यतः ॥१५॥

एवं विनिश्चयं कृत्वा श्वोभूत इति राघवः ।
विसर्जयामास तदा सर्वांस्ताञ्शत्रुसूदनः ॥१६॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 26, 1998; Send corrections to sanskrit@cheerful.com